दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-203 | 1 | मई 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णचतुर्दशी
ज्येष्ठ 02 प्रविष्ठांशः मङ्गलमयः भवेत्

2 प्रधानमन्त्री मोदी स्वकीय-पञ्चदेशीय-यात्रायाः द्वितीये चरणे नीदरलैण्ड-देशं प्राप्नोत्

3 चतुर्षु नगरनिगमेषु विकसिष्यति कमलम्, कांग्रेस- शासनस्य विरुद्धं जनानां मध्ये आक्रोशः- जयराम-ठाकुरः

5 दिल्ली पब्लिक स्कूल, वाराणस्यां छात्रपरिषद्-गठनसमारोहे "प्रतिस्थापनम्-२०२६" – नेतृत्वस्य, कर्तव्यस्य संस्कृतेश्च जीवन्तः संगमः

## संयुक्त अरब अमीरातदेशे प्रधानमन्त्रिणः नरेन्द्रमोदिनः भव्यं स्वागतम्



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी संयुक्त अरब अमीरातस्य यूरोपीय देशानां च षड्दिवसीय यात्रायाः प्रथमचरणे अबुधाबी-नगरे अस्ति। यू.ए.ई. देशस्य राष्ट्रपतिना शेख् मोहम्मद् बिन् जायद् अल-नह्यान् इत्यनेन विमानपत्तने तस्य स्वागतं कृतम्, औपचारिक सम्मानः च प्रदत्तः। यदा तस्य विमानम् एमिरती वायुक्षेत्रं प्रविष्टम्, तदा संयुक्त अरब अमीरातस्य एफ-16 युद्धविमानेन तस्य अनुरक्षणं कृतम्। ततः परं प्रधानमन्त्रिणा मोदिना राष्ट्रपतिना शेख मोहम्मद् बिन् ज़ायद् इत्यनेन सह विभिन्नेषु विषयेषु वार्ता कृता। पश्चिम-एशियायां प्रचलितेन द्वन्द्वेन सम्बद्धानां वैश्विक आपूर्ति-समाह्वानानां मध्ये एषा वार्ता अभवत्। स्वस्य प्रारम्भिक भाषणे प्रधानमन्त्रिणा श्रीमोदिना यू.ए.ई. देशे सद्यः एवं जातानाम् आक्रमणानां दृढतया निन्दा कृता। राष्ट्रपति शेख मोहम्मद् बिन् ज़ायद् इत्यमुं भ्रातेति सम्बोधयन् सः कठिन-समये वू.ए.ई. नेतृत्वेन प्रदर्शितस्य धैर्यस्य प्रशंसाम् अकरोत्। सः अमीरात-देशाय भारतस्य समर्थनं पुनरपि प्रतिपादितवान् तथा च वर्तमान-वैश्विक संघर्षस्य काले संवादः कूटनीतिः चैव एकमात्रः समाधानः अस्ति।

## नीट यूजी इति चिकित्सा-प्रवेशपरीक्षा जून मासस्य एकविंशति दिनाङ्के पुनः आयोजयिष्यते -एनटीए



एनटीए इति अभिकरणेन घोषितं यत् षड्विंशत्यधिक द्विसहस्रतम वर्षस्य नीट यूजी इति चिकित्सा-प्रवेशपरीक्षा जून मासस्य एकविंशति दिनाङ्के पुनः आयोजयिष्यते। इतः प्राक् अस्य मासस्य तृतीयदिनाङ्के आयोजिता परीक्षा कथितेन पेपर लीक-इत्यनेन कारणेन निरस्ति कृता आसीत्, अपि च सी. बी. आई. अस्मिन् विषये अन्वेषणं कुर्वन् अस्ति एन.टी.ए. अभिकरणेन अभ्यर्थिनां मातापितरौ केवलं एन्. टी. ए. इत्यस्य आधिकारिक माध्यमानां आश्रयं कर्तुं प्रार्थितम्। अत्रान्तरे, केन्द्रीयशिक्षामन्त्री धर्मेन्द्र प्रधानः अद्य अवदत् यत् छात्राः सर्वकारस्य प्राथमिकताः सन्ति, केन्द्रम् तेषां विषये संवेदनशीलम् अस्ति। नवदिल्ल्यां प्रसार-माध्यमान् सम्बोधयन्, श्रीप्रधानः परीक्षा-प्रक्रियायां निष्पक्षतां पारदर्शितां च आश्वासितवान्।शिक्षा मन्त्रिणा स्वीकृतं यत् एन्. टी. ए. संस्थायां निश्चितपरिष्काराणां आवश्यकता अस्ति, तथा च भविष्ये अनियमिततां निवारयितुं परीक्षा-व्यवस्थां सुदृढं कर्तुं उपायान् वयं करिष्यामः। सः अग्रे अवदत् यत् नीट यू.जी. परीक्षा विद्यमानस्य ओ. एम्. आर्. आधारितस्य प्रकारस्य स्थाने आगामिवर्षात् सङ्गणक-आधारित-परीक्षायाः (सी. बी. टी.) प्रकारेण सञ्चालिता भविष्यति।

## भारतं सर्वैः सहभागिभिः सह "परिणामकारि-बहुपक्षवादस्य" लक्ष्यस्य प्रगत्यै प्रतिबद्धम्-जयशङ्करः



हिमसंस्कृतवार्ता। विदेशमन्त्री डॉ. एस्. जयशङ्करः अवदत् यत् भारतं सर्वैः सहभागिभिः सह "परिणामकारि-बहुपक्षवादस्य" लक्ष्यस्य प्रगत्यै प्रतिबद्धम् अस्ति। नवदिल्ल्यां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य ब्रिक्स्-विदेशमन्त्रिमण्डलस्य द्वितीय-दिवसस्य मुक्त-सम्मेलनम् सम्बोधयन् डॉ. जयशङ्करः उक्तवान् यत् अस्य समूहस्य विस्तारितं सहभागित्वं द्रुतगत्या परिवर्तमानस्य वैश्विक सन्दर्भ बहुपक्षीय सहयोगानां सुदृढीकरणाय सर्वेषां नेतृणां महत्त्वबोधं प्रतिबिम्बयति। सः इदमपि अवदत् यत् अन्तर्राष्ट्रीय-वित्तीय-संरचनायाः परिष्कारः अत्यावश्यकः अस्ति। ततः पूर्वं डॉ. एस्. जयशङ्करः नवदिल्ल्यां इरान देशस्य विदेशमन्त्रिणा अब्बास् अराघची इत्येनेन सह मिलितवान्। सामाजिक-पटले डॉ. जयशङ्करः अवदत् यत् उभौ नेतारौ पश्चिम एशियायाः स्थिति तस्याः प्रभावान् च चर्चितवन्तौ। द्विपक्षीय-विषयेषु परस्पर-हितसम्बद्ध-विषयेषु च मतानाम् आदान-प्रदानम् अपि अभवत्। निक्स्-विदेशमन्त्रिमण्डले षड्विंशत्यधिक-द्विसहस्रतमवर्षे श्री अराघची-वर्यस्य सहभागितायाः अपि तेन प्रशंसा कृता।



## भाजपेति दलस्य विधायकः रथीन्द्र बसु इत्येषः पश्चिमबङ्गालराज्यस्य विधानसभायाः नूतनः अध्यक्षः

भाजपेति दलस्य विधायकः रथीन्द्र बसु इत्येषः पश्चिमबङ्गालराज्यस्य विधानसभायाः नूतनः अध्यक्षः निर्विरोध रूपेण निर्वाचितः। गत प्रातः प्रो-टेम्-स्पीकर तपस रॉयस्य निरीक्षणे अस्य पदस्य निर्वाचनम् अभवत्। बसु वर्येण सद्यः एव आयोजिते विधानसभानिर्वाचने कूच बिहार दक्षिणतः भाजपेति दलस्य प्रत्याशी-रूपेण प्रथमं विजयं पञ्जीकृतम्। मुख्यमन्त्रिणा सुवेन्दु अधिकारिणा अधिकृतरूपेण श्रीबसु वर्यस्य नाम प्रस्तावितम्। सभया ध्वनिमतेन नियुक्तिं तस्य दृढीकृतम्।

## सुभाषितम्

**तपः श्रेष्ठं प्रजानां हि,**
**मूलमेतन्न संशयः।**
**कुटुम्बविधिनानेन,**
**यस्मिन् सर्वं प्रतिष्ठितम्।।**
(महाभारत, शान्तिपर्व- ११/२१)

भावार्थः- तपस्या श्रेष्ठ कर्म है। निस्संदेह यही प्रजावर्ग का मूल कारण है। परन्तु गार्हस्थ्य-विधायक शास्त्र के अनुसार इस गार्हस्थ्यधर्म में ही सारी तपस्या प्रतिष्ठित है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ता
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## क्यूबा देशस्य विदेशमन्त्रिणा ब्रूनो रोड्रिग्स् पारिल्ला इत्यनेन सह मेलनं विहीतवान् विदेशमन्त्री डॉ. जयशङ्करः



विदेशमन्त्री डॉ. जयशङ्करः क्यूबा देशस्य विदेशमन्त्रिणा ब्रूनो रोड्रिग्स् पारिल्ला इत्यनेन सह मेलनं विहीतवान्। सामाजिक-पटले प्रकाशिते सन्देशे डॉ. जयशङ्करः अवदत् यत् स्वास्थ्य, विकास-सहभागित्वम्, क्षमता-निर्माणम् इत्यादिषु विषयेषु सहयोगसम्बद्धां चर्चाम् उभौ नेतारौ अकुरुताम् उभयोः देशयोः विदेशमन्त्रालययोः मध्ये नियमित परामर्शाय सहमति-पत्रस्य आदान-प्रदानम् अपि अभवत्।

# प्रधानमन्त्री मोदी स्वकीय-पञ्चदेशीय-यात्रायाः द्वितीये चरणे नीदरलैण्ड-देशं प्राप्नोत्



प्रधानमन्त्री नरेन्द्रमोदी स्वकीय-पञ्चदेशीय-भ्रमणस्य द्वितीये चरणे नीदरलैण्ड-देशं सम्प्राप्तवान्। मई-मासस्य १५ दिनाङ्कतः १७ दिनाङ्कपर्यन्तं प्रचलन्त्याः अस्याः यात्रायाः अवसरौ प्रधानमन्त्री नीदरलैण्ड-देशस्य प्रधानमन्त्रिणा रॉब जेटेन महोदयेन सह द्विपक्षीयवार्तां करिष्यति तथा च महामहिम-राज्ञा राज्ञ्या च सह मेलिष्यति। व्यापारदृष्ट्या नीदरलैण्ड-देशः भारतस्य प्रमुखः आर्थिक-सहयोगी अस्ति तथा च यूरोप-महाद्वीपे तृतीयः बृहत्तमः निर्यात-गन्तव्यदेशः वर्तते। द्वयोः देशयोः मध्ये २०२४-२५ वर्षे व्यापारः २७.८ अरब डॉलर परिमितः आसीत्। निवेशक्षेत्रे नीदरलैण्ड-देशः भारते चतुर्थः बृहत्तमः निवेशकः अस्ति। इयं यात्रा द्विपक्षीयसम्बन्धेभ्यः परस्ताद् अपि महती अस्ति तथा च अधुना एव सम्पन्नात् भारत-यूरोप-मुक्तव्यापार-समझौता (FTA) इति अनुबन्धात् परं व्यापक-भारत-यूरोपीयसंघ-सम्बन्धान् नूतनं आकारं प्रदास्यति इति आशा अस्ति। श्वः प्रधानमन्त्री मोदी भारतीयसमुदायं सम्बोधयिष्यति तथा च प्रमुखाणां डच-कम्पनीनां मुख्यकार्यकारि-अधिकारिभिः (CEOs) सह अपि मेलिष्यति। सेमीकंडक्टर-चिप्स तथा एआई (आर्टिफिशियल इंटेलिजेंस) क्षेत्रयोः अनेकेषां महत्त्वपूर्णानां सम्मतानां हस्ताक्षराणि भवितुं सम्भावना अस्ति।

# प्रथमवारं सिक्किम्-राज्यं प्रति गमिष्यति उपराष्ट्रपतिः



उपराष्ट्रपतिः सी. पी. राधाकृष्णन्-वर्यः कार्यभारं ग्रहणानन्तरं अद्य प्रथमवारं सिक्किम्-राज्यं प्रति गमिष्यति। भ्रमणावधौ उपराष्ट्रपतिः गङ्गटोक्-नगरे सिक्किम्-राज्यस्य राज्य-दिवसोत्सवे भागं भजिष्यति। सिक्किम्-राज्यस्य राज्यपालः, मुख्यमन्त्री, केन्द्रीय-पूर्वोत्तर-विकास-मन्त्री अपि गङ्गटोक्-नगरस्य मनन-केन्द्रे आयोजिते कार्यक्रमे भागं ग्रहीष्यन्ति।

# सीबीआई इत्यनेन नीट-यूजी-२०२६ (NEET-UG-2026) परीक्षा-प्रश्नपत्र-भेदप्रकरणे (लीक-मामले) मुख्यः आरोपी पी.वी. कुलकर्णी पुणे-नगरात् निगृहीतः




केन्द्रीय-अन्वेषण-ब्यूरो (सीबीआई) इत्यनेन नीट-यूजी-२०२६ परीक्षायाः प्रश्नपत्र-भेदप्रकरणे मुख्यः अभियुक्तः (आरोपी) पी.वी. कुलकर्णी पुणे-नगरात् बन्दीकृतः अस्ति। कुलकर्णी रसायनशास्त्रस्य व्याख्याता (लेक्चरर) अस्ति तथा च राष्ट्रीय-परीक्षा-एजेंसी (एनटीए) इत्यस्य पक्षतः परीक्षाप्रक्रियायां सम्मलितः आसीत्। प्रश्नपत्राणां कृते तस्य सुलभः प्रवेशः (पहुँच) आसीत्। संस्थया विगत-२४ होरासु देशस्य बहुषु स्थानेषु अन्वेषणाह्वानं (तलाशी अभियान) चालितं तथा च बहवः आपत्तिजनकाः दस्तावेजाः, वैद्युतिक-उपकरणानि, चलभाषयन्त्राणि (मोबाइल फोन) च हस्तगतानि कृतानि। सीबीआई-संस्थया ज्ञापितं यत् ह्यः निगृहीतौ द्वौ अभियुक्तौ पारगमन-प्रतिप्रेषणार्थं (ट्रांजिट रिमांड) पुणे-न्यायालये प्रस्तूयेते, तौ च दिल्ली-न्यायालयं प्रति स्थानान्तरितौ करिष्येते। अतः पूर्वं निगृहीतेषु पञ्चसु अभियुक्तेषु त्रयः जयपुरतः, एकः गुरुग्रामतः तथा च एकः नासिकतः अस्ति। दिल्ली-न्यायालयः सर्वान् अभियुक्तान् सप्तदिनात्मकं आरक्षक-अभिरक्षां (पुलिस हिरासत) प्रेषितवान्। अन्यैः बहुभिः सन्दिग्धैः सह अपि पृच्छा (पूछताछ) प्रचलन्ती अस्ति।सीबीआई-संस्थया १२ मई दिनाङ्के शिक्षा-मन्त्रालयस्य उच्चशिक्षा-विभागस्य अभियोगस्य (शिकायत) आधारेण नीट-यूजी-२०२६ परीक्षायाः कथित-पत्रभेद-प्रकरणं पञ्जीकृतं कृतम् अस्ति।

# इन्धनसंरक्षणस्य समर्थने आवासन-शहरीकार्य-राज्यमन्त्रिणा तोखनसाहुना स्वकीयवासात् सङ्कल्पभवनं यावत् ३ किमी पर्यन्तं द्विचक्रिका चालिता

आवासन-शहरीकार्य-राज्यमन्त्रिणा तोखनसाहुना प्रधानमन्त्रिणः नरेन्द्रमोदिनः इन्धनसंरक्षणस्य आह्वानस्य (अपील) समर्थनं कुर्वता नवदिल्ल्यां स्थितात् स्वकीयावासात् सङ्कल्पभवनं यावत् त्रि-किलोमीटर-परिमितं द्विचक्रिका (साइकिल) चालिता। अस्मिन् अवसरे श्रीसाहुना कथितं यत् प्रधानमन्त्रिणा कोविद्-काले आरब्धानां पद्धतीनां यथा— गृहगृहात् कार्यम् (वर्क फ्रॉम होम), अन्तर्जाल-कक्षाः (ऑनलाइन क्लासेज) तथा च आभासी-गोष्ठ्यः (वर्चुअल मीटिंग्स) इत्यादीनां पुनः आरम्भाय कृतम् आह्वानम् अनिश्चितासु वैश्विकपरिस्थितिषु व्यापक-राष्ट्रहिताय अस्ति।



तेन उक्तं यत् प्रत्येकं नागरिकेण राष्ट्रसेवात्वेन इन्धनसंरक्षणे स्वयोगदानं दातव्यम्। श्रीसाहुना प्रतिपादितं यत् इन्धनसंरक्षणं न केवलम् एका आर्थिकी आवश्यकता अस्ति, अपितु एकः सामूहिकः राष्ट्रियधर्मः (कर्तव्यं) अपि वर्तते।

# आईजीएल (इन्द्रप्रस्थ गैस लिमिटेड) इत्यनेन सीएनजी-

## वाष्पस्य मूल्येषु रूप्यकद्वयस्य वृद्धिः कृता

इन्द्रप्रस्थ गैस लिमिटेड (IGL) इत्यनेन अद्य सीएनजी (CNG) वाष्पस्य मूल्येषु रूप्यकद्वयस्य (2 ₹) वर्धनं कृतम् अस्ति। अनेन सह एव दिल्ल्यां प्रति-किलोग्रामं सीएनजी-मूल्यं नवसप्ततिः रूप्यकाणि नव पैसे (79.09 ₹), गाजियाबाद-नोएडा नगरयोः सप्तअशीतिः रूप्यकाणि सप्ततिः पैसे (87.70 ₹) तथा च गुरुग्रामे अस्य मूल्यं चतुरशीतिः रूप्यकाणि द्वादश पैसे (84.12 ₹) सञ्जातम्।

# मादकद्रव्याणां तस्करी समाजायाः आगामिपिढ्याः च कृते सङ्कटः : गृहमन्त्री अमितशाहः



गृहमन्त्रिणा अमितशाहेन कथितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतेन २०४७ (द्विसहस्रसप्तचत्वारिंशत्) वर्षपर्यन्तं व्यसनमुक्तभारतस्य (नशामुक्तभारतस्य) राष्ट्रियं लक्ष्यं निर्धारितम् अस्ति। तेन उक्तं यत् भारतीयसुरक्षासंस्थाभिः मादकद्रव्याणां गुप्तदलानां (गैंग) उन्मूलनाय एका कार्ययोजना सज्जीकृता अस्ति, ताः च अस्य लक्ष्यस्य दिशि कार्यं कुर्वन्त्यः सन्ति। नवदिल्ल्यां 'आर. एन. काओ स्मृति व्याख्यानम्' ददत् गृहमन्त्री अवदत् यत् मादकद्रव्याणां तस्करी (अवैधव्यापारः) समाजस्य भाविपीढीनां च कृते महद् भयं वर्तते, अस्य च कृते एकस्य व्यापकस्य समाधानस्य आवश्यकता अस्ति। तेन दृढीकृतं यत् मादकद्रव्यान् प्रति भारतस्य 'शून्यसहिष्णुता' (Zero Tolerance) नीतिः निश्चयेन पालिष्यते। श्रीशाहेन प्रतिपादितं यत् मादकद्रव्याणां धनेन आतङ्कवादिनां आपराधिकसमूहानां च वित्तपोषणं भवति तथा च समानान्तर-अर्थव्यवस्थायाः वर्धनं भवति, अस्मिन् विषये च जागरूकता वर्तते।

# तैल-डीजल-मूल्येषु प्रति-लीटरं रूप्यकत्रयस्य वृद्धिः



वैश्विकस्तरे अपक्वशैलतैलस्य (कच्चे तेल की) मूल्येषु सञ्जातं तीव्रवर्धनं दृष्ट्वा तैलविपणनसंस्थाभिः पेट्रोल-डीजल-मूल्येषु प्रति-लीटरं रूप्यकत्रयस्य (3 ₹) वृद्धिः कृता अस्ति। अनेन दिल्ल्यां सम्प्रति पेट्रोल-मूल्यं सप्तनवतिः रूप्यकाणि सप्तसप्ततिः पैसे (97.77 ₹) प्रति-लीटरं, तथा च डीजल-मूल्यं नवतिः रूप्यकाणि सप्तषष्टिः पैसे (90.67 ₹) प्रति-लीटरं सञ्जातम्। मुम्बय्यां अधुना पेट्रोल-तैलं षडधिकशतं रूप्यकाणि अष्टषष्टिः पैसे (106.68 ₹) तथा च डीजल-तैलं त्रिनवतिः रूप्यकाणि चतुर्दश पैसे (93.14 ₹) प्रति-लीटरमित्यनेन दरेण प्राप्स्यते। कोलकाता-नगरे पेट्रोल-मूल्यं अष्टाधिकशतं रूप्यकाणि चतुःसप्ततिः पैसे (108.74 ₹) तथा च डीजल-मूल्यं पञ्चनवतिः रूप्यकाणि त्रयोदश पैसे (95.13 ₹) प्रति-लीटरं भविष्यति। चेन्नै-नगरे पेट्रोल-मूल्यं त्र्यधिकशतं रूप्यकाणि सप्तसप्ततिः पैसे (103.77 ₹) तथा च डीजल-मूल्यं पञ्चनवतिः रूप्यकाणि पञ्चत्रिंशत् पैसे (95.35 ₹) प्रति-लीटरं निर्धारितं कृतम् अस्ति।

# चतुर्षु नगरनिगमेषु विकसिष्यति कमलम्, कांग्रेस-शासनस्य विरुद्धं जनानां मध्ये आक्रोशः- जयराम-ठाकुरः



**हिमसंस्कृतवार्ताः- मण्डी।** जयरामठाकुरः मण्डी-नगरनिगम- निर्वाचन- प्रचारस्य अन्तिमदिने मण्डीनगरस्य सर्वेषु चतुर्दश- वार्डेषु भव्य-मार्ग-प्रदर्शनम् तथा चौहट्टा-विपण्यां विशाल-जनसभां च आयोज्य कांग्रेस-शासनस्य विरुद्धं शङ्खनादं कृत्वा विश्वासम् अकरोत् यत् प्रदेशस्य चतसृषु नगरनिगमेषु मण्डी, पालमपुरं, धर्मशाला, सोलनम् इत्येतेषु च भारतीयजनतापक्षः विशाल-बहुमतेन ऐतिहासिकीं विजयम् अर्जयितुं गच्छति।

जनसभां सम्बोधयन् जयरामठाकुरः उक्तवान् यत् वर्तमान- सुक्खुशासनस्य जनविरोधिनीतिभिः मिथ्या-प्रतिज्ञाभिश्च हिमाचलप्रदेशस्य जनानां मोहभङ्गः जातः अस्ति। अद्य प्रदेशस्य प्रत्येकः वर्गः अस्य शासनस्य कार्यप्रणाल्या पीडितः सन् एतत् शासनं सत्तातः निष्कासयितुं मनसि कृतवान् अस्ति। एतानि नगरनिगम-निर्वाचनानि केवलं स्थानीय- निर्वाचनानि न, अपि तु प्रदेशे कांग्रेस- पक्षस्य प्रस्थानस्य पटकथां लिखन्तः सिद्धाः भविष्यन्ति।

तेन उक्तं यत् "अहं चतसृषु स्थलेषु प्रचारं कृत्वा आगतः अस्मि तथा निश्चयेन वक्तुं शक्नोमि यत् चतसृष्वपि स्थलेषु कमलं विकसिष्यति तथा अस्य शासनस्य प्रस्थानस्य निनादं निनादिष्यति।"

मुख्यमन्त्रिणं प्रति आदर्श- निर्वाचन- आचारसंहितायाः प्रत्यक्ष- उल्लङ्घनस्य गम्भीरम् आरोपं कुर्वन् जयरामठाकुरः उक्तवान् यत् पराजयस्य भयेन व्याकुलं कांग्रेसदलम् अधुना प्रलोभन- राजनीतिम् आश्रितम् अस्ति। अस्य प्रमाणं मुख्यमन्त्रिणा निर्वाचन-सभासु प्रत्यक्षतया उक्तं यत् यदि कांग्रेस-पार्षदाः विजयं प्राप्नुयुः तर्हि वार्डेभ्यः पञ्चाशत्लक्षतः आरभ्य एक-कोटि- रूप्यकपर्यन्तं वित्तं प्रदास्यते।सः एतत् वक्तव्यं लोकतन्त्रस्य मर्यादायाः अपमानं तथा मतदातॄणां क्रयणस्य असफलः प्रयासः इति निरूप्य उक्तवान् यत् मुख्यमन्त्रिणः एतद् कृत्यं निर्वाचन- आयोगस्य निष्पक्षतां प्रति आह्वानं ददाति। अस्य विरुद्धं भारतीयजनतापक्षः औपचारिकरूपेण उपालम्भं पञ्जीकृत्य कठोर- अनुशासनात्मक- कार्यविधेः याचनां करोति।

जयरामठाकुरः मण्ड्यां समुपस्थितं विशालं जनसमूहम् भाजपायाः विजयस्य अग्रिम-सङ्केतम् इति कथयन् कार्यकर्तॄन् आहूतवान् यत् ते मतदान-दिनपर्यन्तं पूर्ण-ऊर्जया स्थिताः स्युः, यतः जनताः अधुना कांग्रेसस्य कुशासनस्य संवैधानिक- संस्थानानां च अपमानस्य प्रतिशोधं ग्रहीतुं पूर्णतया सज्जा अस्ति। आगामि-मतगणनादिने पालमपुरतः आरभ्य सोलनपर्यन्तं कांग्रेसपक्षस्य पूर्णतया पराभवः निश्चितः इति अपि तेन उक्तम्।

अस्मिन् अवसरे तेन सह विधायकाः अनिलशर्मा, इन्द्रसिंहगान्धि, पूर्णचन्दः, पूर्व-महापौरः वीरेंद्र भट्टः, भाजपायाः महामन्त्री पायल-वैद्या तथा जिलाध्यक्षः निहालचन्दः अपि उपस्थिताः आसन्।

# सर्वकारेण स्वर्णस्य आयाते शत-किलोग्रामपरिमितं सीमा निर्धारिता



सर्वकारेण अग्रिम-प्राधिकार-योजनायाः (Advance Authorization Scheme) अन्तर्गतं स्वर्णस्य आयाते एकशत-किलोग्रामपरिमितं (100 kg) सीमा निर्धारिता अस्ति। इयं योजना आभूषण-निर्यातकेभ्यः शून्य-शुल्केन (कर-रहितं) अपक्वनिर्माणसामग्र्याः (कच्चे माल की) आयातस्य अनुमतिं ददाति। विदेशव्यापार-महानिदेशालयेन एकस्यां सार्वजनिकसूचनायां कथितं यत् अस्याः योजनायाः अन्तर्गतं निर्यातकः एकस्मिन् वारे अधिकतमं शत-किलोग्रामपरिमितं स्वर्णमेव विना केनपि शुल्केन आनेतुं (मँगाना) शक्नोति। महानिदेशालयेन प्रथमतया आवेदनं कर्तॄणां कृते निर्माण-संयन्त्राणां (Manufacturing Plants) भौतिक-निरीक्षणम् अनिवार्यं कृतम्, येन तेषां परिचालन-स्थितेः क्षमतायाः च परिज्ञानं भवेत्। अस्मिन् इदमपि कथितं यत् पुनः शुल्क-रहित-स्वर्णस्य आयातार्थं कम्पन्या स्वकीय-पूर्वतन-लक्ष्यस्य (Target) न्यूनतिन्यूनं ५० प्रतिशतं (50%) निर्यातं पूर्णं करणीयम् भविष्यति। पारदर्शितां स्थापयितुं क्षेत्रीयकार्यालयैः प्रतिमासं अस्य विवरणं (रिपोर्ट) महानिदेशालयाय प्रेषणीयम् इति निर्देशितम्। अतः पूर्वम्, अस्याः योजनायाः अन्तर्गतं स्वर्णस्य आयाते कापि सीमा नासीत्।

# धर्मशाला पर्यटनस्य वैश्विक-केन्द्रं भविष्यति, मुख्यमन्त्रिणः घोषणा, प्रतिवार्डस्य विकासाय एक- कोटि- रूप्यकाणां व्ययः



**हिमसंस्कृतवार्ताः- धर्मशाला।** मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना धर्मशालायां विकासस्य नूतनम् अध्यायम् आलिखितुं उद्घोषयता उक्तं यत् काङ्गड़ाजनपदः प्रदेशस्य 'पर्यटन- राजधानी' रूपेण विकसितः क्रियते। तेन उक्तं यत् धर्मशालायां पर्यटकान् आकर्षयितुं ४०० तः ५०० कोटि-रूप्यकाणां व्ययेन एकस्य भव्यस्य अन्ताराष्ट्रिय-सम्मेलनकेन्द्रस्य निर्माणं करिष्यते। मुख्यमन्त्रिणा पूर्ववर्ति-भाजपा-सर्वकारं लक्ष्यीकृत्य उक्तं यत् धर्मशालायै 'स्मार्ट-सिटी' परियोजना काङ्ग्रेस-सर्वकारस्य एव देयता आसीत्, किन्तु गतेषु वर्षेषु तस्य तादृशं स्वरूपं न अभवत्, यादृशं जनता अपेक्षितवती। नगरस्य सुनियोजित-विकासाय मुख्यमन्त्रिणा सर्वेभ्यः १७ वार्ड-क्षेत्रेभ्यः १-१ कोटि-रूप्यकाणां राशिः स्वीकृता इति सूचितम्। निर्वाचन- आचारसंहिता- कारणेन औपचारिक-घोषणा अवशिष्टा वर्तते, किन्तु धनं निर्गतम् अस्ति, शीघ्रमेव च धरातले कार्यं प्रारप्स्यते।

प्रदेशस्य वित्तीयस्थितेः विषये सूचनां ददता मुख्यमन्त्रिणा सुक्खुमहोदयेन उक्तं यत् भाजपा-सर्वकारः काङ्ग्रेसपक्षाय ७६ सहस्र- कोटि-रूप्यकाणाम् ऋणं त्यक्त्वा गतः। क्षेत्रस्य प्रशासनिकमहत्त्वं वर्धयितुं शिमला-तः सप्त कार्यालयाः धर्मशालां प्रति स्थानान्तरिताः। अनेन सह, सम्पर्कसुविधां विकसितुं धर्मशाला- विमानक्षेत्रस्य विस्तारस्य तथा क्षेत्रे त्रयाणां नूतनानां 'हेलिपोर्ट' निर्माणस्य योजनायां कार्यं प्रचलति, येन शक्तिपीठेषु भक्तानां गमनं सुलभं भविष्यति। मुख्यमन्त्रिणा धर्मशालायां काङ्ग्रेस-नेतुः देवेन्द्र जग्गीमहोदयस्य प्रशंसां कुर्वता नगरनिगम- निर्वाचनाय काङ्ग्रेसस्य घोषणापत्रम् अपि विमोचितम्। अस्मिन् अवसरे तेन उक्तं यत् काङ्ग्रेसपक्षः धर्मशालानगरं आदर्श-नगरं (मॉडल नगर) निर्मास्यति।

## मुख्यमन्त्रिणः कटाक्षः, 'सोशल-मीडिया' पर्यन्तं सीमिता भाजपा

मुख्यमन्त्रिणा भाजपा-नेतॄन् प्रति उपहासं कुर्वता उक्तं यत् प्रतिपक्षः अधुना केवलं सामाजिक- माध्यमेषु एव सीमितः जातः। तेन केन्द्रसर्वकारं प्रति प्रश्नं कृतं यत् प्रधानमन्त्रिणा मोदी-महोदयेन काङ्गड़ाक्षेत्राय घोषितायाः १५०० कोटि-रूप्यकाणां राशेः एकमपि रूप्यकं प्रदेशाय किमर्थं न प्राप्तम्? सुक्खुमहोदयेन भाजपादलस्य आन्तरिककलहस्य विषये व्यङ्ग्यं कुर्वता उक्तं यत् भाजपा-पक्षः पञ्चसु समूहेषु विभक्तः अस्ति।

# नगरनिगमक्षेत्रे अन्तर्भूतानां पैतृक-ग्रामाणां निष्कासनस्य आवश्यकता चेत्, निर्वाचनानन्तरं भविष्यति विचारः- मुख्यमंत्री




हिमसंस्कृतवार्ताः- सोलनम्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना शुक्रवासरे नगरनिगम- प्रचार-अभियानस्य अन्तिमे दिने सोलननगरे काङ्ग्रेस-प्रत्याशिनां कृते मार्ग-प्रदर्शनम् ('रोड-शो') आयोजितम्। जनसभां सम्बोधयता तेन एकं महत् आश्वासनं दत्तम्। तेन उक्तं यत् निगमक्षेत्रे सम्मिलितानां पैतृक-ग्रामाणां सीमातः बहिः निष्कासनस्य आवश्यकता यदि भवति, तर्हि निर्वाचनानां पश्चात् अस्मिन् विषये विचारः करिष्यते। तेन जनसभायां 'बघाट-बैङ्क' इत्यस्य पुनर्निरीक्षणस्य विषयोऽपि उपस्थापितः। मुख्यमन्त्रिणा उक्तं यत् सर्वकारः सम्पूर्णेषु नगरेषु भूगर्भीय-नलिका-तन्त्र निर्माणाय विचारं कुर्वन् अस्ति। अन्यतः, प्रतिपक्षनेतुः जयरामठाकुरस्य अद्य मण्डी- नगरनिगमस्य निर्वाचनप्रचारे पूर्णः उत्साहः दृष्टः।

# बद्दी-क्षेत्रस्य बृहत्तमा 'ट्रक-संघेन मालभाटकं वर्धितम्, उत्पादाः महार्घाः भविष्यन्ति



**हिमसंस्कृतवार्ताः - बद्दी।** डीजल-इन्धनस्य मूल्यवृद्धेः अनन्तरमेव मूल्यवृद्धेः प्रभावः दृश्यते। एशिया-महाद्वीपस्य बृहत्तम ट्रक-संघेन मालभाटकं (Freight) वर्धितम् अस्ति। भाटकवृद्ध्या बीबीएन (BBN) औद्योगिकक्षेत्रे निर्मिताः उत्पादाः अपि अधुना महार्घाः भविष्यन्ति। भाटकस्य प्रभावः अपरिपक्व-वस्तूनाम् (Raw material) उपरि अपि भविष्यति। केन्द्रेण डीजल-मूल्ये ३ रूप्यकाणां वृद्धिः कृता अस्ति। ट्रक-यूनियन इत्यस्य 'बीबीएनआईए' (BBNIA) इत्यनेन सह एकं सहमति-पत्रं (MoU) हस्ताक्षरितम् अस्ति, यस्य अन्तर्गतं प्रतिरूप्यकं मूल्यवृद्धौ लघु-वाहनेषु ३० पैसे तथा बृहत्-वाहनेषु ५० पैसे भाटकं वर्धिष्यते। यदि मूल्यं न्यूनं भवति, तर्हि अनेनैव अनुपातेन भाटकं न्यूनं भविष्यति।
अधुना एतावत् भविष्यति मालभाटकम्
३ रूप्यकाणां वृद्ध्या षट्-चक्र-युक्तेषु वाहनेषु ९० पैसे तथा दश-चक्र-युक्तेषु वाहनेषु सार्ध-एक-रूप्यकं (१.५०) भाटकं वर्धितम्। शुक्रवासरतः ट्रक-संघेन नूतनं भाटकं प्रवर्तितम्। बद्दी-तः दिल्ली-नगरं प्रायः ३०० कि.मी. अस्ति। अधुना दिल्लीं गच्छत्सु लघु-ट्रक-वाहनेषु २३४ रूप्यकाणि तथा बृहत्-ट्रक-वाहनेषु ४०० रूप्यकाणि प्रति-ट्रक भाटकं वर्धिष्यते। तथैव बद्दी-तः मुम्बई-नगरं १६८४ कि.मी. अस्ति। लघु-वाहनानां भाटकं १५१५ रूप्यकाणि तथा बृहत्-वाहनानां २५०० रूप्यकाणि वर्धिष्यते। कोलकाता-नगरस्य कृते लघु-ट्रक-भाटकं १६३५ रूप्यकाणि तथा बृहत्-ट्रक-भाटकं २७२५ रूप्यकाणि वर्धिष्यते। चेन्नई-नगरस्य कृते लघु-ट्रकस्य २२४४ रूप्यकाणि तथा बृहत्-ट्रकस्य ३७४१ रूप्यकाणि भाटकं वर्धिष्यते।

## भाटकवृद्ध्या अपरिपक्व-वस्तूनां सिद्ध-वस्तूनां च मूल्यानि वर्धिष्यन्ते-बीबीएनआईए

बद्दी-बरोटीवाला-नालागढ़-इण्डस्ट्रियल-यूनियन ('बीबीएनआईए') इत्यस्य महासचिवः रजनीश-विज-महोदयः अवदत् यत् भाटकवृद्ध्या अपरिपक्व-वस्तूनाम् सिद्ध-वस्तूनां च मूल्यानि वर्धिष्यन्ते। अस्यां प्रतिस्पर्धायां कम्पनी-सञ्चालकानां कृते स्ववस्तु-विक्रयणं कठिनं भविष्यति। पूर्वमेव विपण्यां मन्दी वर्तते, मूल्यवृद्ध्या एषा स्थितिः अधिकं गभीरा भविष्यति। ट्रक-यूनियन इत्यस्य अध्यक्षः विद्यारत्न-चौधरी अवदत् यत् बीबीएनआईए इत्यनेन सह अस्माकं सहमतिः (MoU) अस्ति। तदनुसारं यदि डीजल-मूल्ये एकरूप्यकस्य वृद्धिः भवति, तर्हि लघु-वाहनेषु ३० पैसे तथा बृहत्-वाहनेषु ५० पैसे प्रति कि.मी. वर्धिताः। एतद् भाटकं शुक्रवासरतः प्रवर्तते।

# हिमाचलप्रदेशे पञ्चसु दलेषु विभक्ता भाजपा, जयराम-बिन्दलयोः निष्कासने सर्वे संलग्नाः- सुक्खु




**हिमसंस्कृतवार्ताः शिमला।** सोलननगरे मुख्यमंत्री उक्तवान् यत् जयराम ठाकुरः पुनः मुख्यमन्त्री भवितुं स्वप्नानि पश्यति स्म, किन्तु बिन्दलः तं सततं पीडयति स्म। सः व्याजेन उक्तवान् यत् यदा नवविधायकानां क्रय- विक्रयस्य घटना अभवत्, तदा जयराम ठाकुरः कञ्चुक-ऊरुकयोः अपि सिलापितवान् आसीत् तथा परदिने राजभवने शपथग्रहणस्य स्वप्नं पश्यति स्म। किन्तु तत् केवलं स्वप्नमेव अवशिष्टम्, यत् २०२७ वर्षेऽपि अपूर्णमेव भविष्यति।

## बघाट- बैङ्कस्य धनं तदानीन्तन-अधिकारिणां दुष्कृत्येन निमग्नम्- मुख्यमन्त्री

सोलनस्य बघाट-बैङ्कविषये सः अवदत् यत् एतत् धनं तदानीन्तन-अधिकारिणां कारगुजार्या निमग्नम् अभवत्। तथापि सरकारः बघाट-बैङ्कस्य जनानां धनं निमज्जितुं न दास्यति। अस्मिन् विषये सरकारः चिन्तनं करोति, शीघ्रमेव समुचितः निर्णयः क्रियते। निर्वाचनानन्तरं नगरेषु विद्युत्ताराणां भूम्यधः- स्थापनकार्यं अपि क्रियते। सोलन-नगर-निगमस्य नूतन-संयुक्त-क्षेत्रेषु जनानां समस्याः दृष्ट्वा सः उक्तवान् यत् आवश्यकता चेत् तानि क्षेत्राणि बहिः अपि कर्तुं शक्यन्ते। यद्यपि आचारसंहितायाः कारणात् काऽपि घोषणा कर्तुं न शक्यते, तथापि जनसमस्यानां विषये विचारः भविष्यति।

## आरडीजी-संबद्धेषु ६० सहस्र-कोटि-रूप्यकाणां निरोधे भाजपानेतारः मौनव्रतम्- सुक्खुः

सः अवदत् यत् २०२३ वर्षे आपदाकाले कांगड़ा एयरपोर्ट स्थिते गग्गल-विमानपत्तने प्रधानमन्त्रिणा सभा कृता आसीत्, तदा दिल्लीं गत्वा १५०० कोटि-रूप्यकाणि दास्यामि इति उक्तम्। किन्तु भाजपायाः पञ्चसु गुटेषु कस्यापि नेतुः एतावती शक्तिः नास्ति यत् सः मुख्यमन्त्रिणः समीपे १५०० कोटिरूप्यकाणां याचनां कुर्यात्। आरडीजी- संबद्धेषु ६० सहस्र-कोटि-रूप्यकाणां निरोधविषये अपि भाजपानेतारः किमपि न वदन्ति। सः उक्तवान् यत् भाजपानेतारः महिलाभ्यः १५०० रूप्यकाणां विषये प्रश्नान् कुर्वन्ति, किन्तु द्वयोः चरणयोः बह्वीभ्यः महिलाभ्यः तत् धनं प्रदत्तम् अस्ति। अधुना तृतीयचरणे बीपीएल-परिवाराणां तथा वार्षिक- आयः २ लक्षरूप्यकात् न्यूनः येषां परिवाराणां महिलाभ्यः १५०० रूप्यकाणि प्रदास्यन्ते।

## "लौकिकन्यायकोशः" "जलतैलबिन्दुन्यायः"

जलस्य उपरि तैलबिन्दुः स्थापितः चेत् स बिन्दुः जलोपरि प्रसरति। तत्रैव घृतस्य बिन्दुः स्थापितः चेत् सः घनत्वं प्राप्नोति। एकत्रैव अधिष्ठाने भिन्नप्रवृत्तिकस्य मनुजद्वयस्य प्रवृत्तिः भिन्ना भवतिति अनेन सूच्यते।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

## हास परिहासम्




माता वदति- "ईश्वरः सर्वत्र गन्तुं न शक्नोति स्म, अतः सः मातरं सृष्टवान्।"
पुत्रः/ पतिः- सम्यक्। राक्षसः सर्वत्र गन्तुं न शक्नोति स्म, अतः सः किं सृष्टवान्?
पत्नी उक्तवती- "राक्षसः सर्वत्र गन्तुं न शक्नोति स्म, अतः सः पतिं सृष्टवान्।"
पुत्रः/पतिः:

## वार्तासंवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य काः विचित्राः वार्ताः सन्ति?
**नन्दिनी-** फ्रान्सदेशे केनचित् मत्तेन मृगेण मण्डलाकारेण भ्रान्तम्। तत्र आरक्षकैः चालकाः सावधानाः कृताः सन्ति।
**काव्या-** मत्तस्य मृगस्य वार्ता तु हास्यकरी अस्ति। अन्यत् पश्यतु, एकेन भारतीयनरेण रेलमार्गे कूर्दितम्। तेन इन्डोनेशियादेशस्य महिलायाः उत्तरीयवस्त्रं रक्षितुं प्रयत्नः कृतः। तस्य चलच्चित्रं बहुभिः दृष्टम्।
**नन्दिनी-** सः नरः साहसं कृतवान् अस्ति। परोपकारः उत्तमः, किन्तु गाजियाबादमण्डले कुम्हेरदा- ग्रामे तु महती प्रगतिः दृष्टा। तत्र ग्रामीणैः सौर-शक्तिः विपुलतया उत्पादिता। अयं ग्रामः अधुना ऊर्जाक्षेत्रे अग्रणीः जातः।
**काव्या-** ग्रामीणानां प्रयासः अभिनन्दनीयः अस्ति। सौरशक्तिः पर्यावरणाय शुभा। किन्तु पुण्यनगरे एका चिन्ताकरी वार्ता श्रुता। भोजनालयस्य केनचित् कर्मकरेण मुद्रित-पत्रात् कस्याश्चित् महिलायाः दूरभाष-सङ्ख्या चोरिता। तेन रात्रौ अयोग्याः सन्देशाः प्रेषिताः।
**नन्दिनी-** एषा घटना तु अतिनिन्दनीया अस्ति। कर्मकरेण अपराधः कृतः अस्ति। आरक्षकैः सः दण्डनीयः। अद्य एतावती एव वार्ता। धन्यवादः।

## हिमज्ञानप्रश्नोत्तरी

**१. प्रश्नः: कः ग्रहताराणां राजा इति कथ्यते?**
उत्तरम्: सूर्यः ग्रहताराणां राजा इति कथ्यते।
**२. प्रश्नः: संस्कृतभाषायाः जनकः कः अस्ति?**
उत्तरम्: महर्षिः पाणिनिः संस्कृतव्याकरणस्य जनकः अस्ति।
**३. प्रश्नः: अस्माकं राष्ट्रियपुष्पं किम् अस्ति?**
उत्तरम्: अस्माकं राष्ट्रियपुष्पं कमलम् अस्ति।
**४. प्रश्नः: रामायणस्य रचयिता कः अस्ति?**
उत्तरम्: रामायणस्य रचयिता महर्षिः वाल्मीकिः अस्ति।
**५. प्रश्नः: पृथिव्याः समीपतमो ग्रहः कः वर्तते?**
उत्तरम्: पृथिव्याः समीपतमो ग्रहः शुक्रः वर्तते।
**६. प्रश्नः: कति वेदाः सन्ति, तेषां नामानि कानि?**
उत्तरम्: चत्वारः वेदाः— ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च।

# दिल्ली पब्लिक स्कूल, वाराणस्यां छात्रपरिषद्-गठनसमारोहे

## “प्रतिस्थापनम्-२०२६” – नेतृत्वस्य, कर्तव्यस्य संस्कृतेश्च जीवन्तः संगमः







**हिमसंस्कृतवार्ता।** ऐषमः मई मासस्य १३ दिनाङ्के Delhi Public School Varanasi विद्यालयस्य बहुविकल्पीयसभागारे “प्रतिस्थापनम्-२०२६” नाम्नः भव्यस्य प्रेरणादायकस्य च छात्रपरिषद्-गठनसमारोहस्य आयोजनम् अभवत्। अयं समारोहः केवलं कार्यक्रमः नासीत्, अपितु नेतृत्वस्य बीजानां चेतनाभूमौ रोपणस्य प्रेरणामयी संकल्पयात्रा आसीत्।

अस्मिन् समारोहस्य अवसरस्य कक्षा ६, ७ तथा ८ इत्येतासां विद्यार्थिभिः नेतृत्वभावना, कर्तव्यनिष्ठा, सांस्कृतिकगरिमा च सम्यग् समन्विताः। नव-निर्वाचितानां प्रधान-विद्यार्थि-सेवकानां शपथग्रहणम्, प्रेरणादायिन्यः सांस्कृतिक-प्रस्तुतयः, पारदर्शी-नेतृत्व-चयन-प्रक्रिया च अस्य कार्यक्रमस्य प्रमुखवैशिष्ट्यानि आसन्। दायित्वप्रधानस्य अस्य आयोजनस्य साक्षिभूताः अभिभावकाः अपि उपस्थिताः आसन्। ते स्वसन्तानानां गौरवपूर्णक्षणान् प्रत्यक्षतया अनुभूय विद्यालयस्य अस्य प्रेरणादायकस्य उपक्रमस्य मुक्तकण्ठेन प्रशंसाम् अकुर्वन्।कार्यक्रमस्य आरम्भः स्वागतगीतैः, शङ्खनादेन दीपप्रज्वलनेन च अभवत्। एतेन सम्पूर्णः वातावरणः भारतीय-सांस्कृतिक-मूल्यैः सकारात्मक-ऊर्जया च ओतप्रोतः अभवत्। विद्यालयस्य प्रधानाचार्या श्रीमती मुनमुन सेनगुप्ता, मुख्यातिथिः Indian Institute of Technology (BHU) संस्थायाः कुलसचिवः श्री सुमितकुमार बिस्वास महोदयः तथा समयपालनशीलाः अभिभावकाः वैदिकमन्त्र-उच्चारणस्य मध्ये दीपप्रज्वलनम् अकुर्वन्।विद्यालयस्य छात्रैः पारम्परिक-भावभङ्ग्या मधुरस्मितेन च मुख्यातिथीनां, शिक्षकाणां, अभिभावकानां, आगन्तुकानां च हार्दिकं स्वागतं सत्कारश्च कृतः।मुख्यातिथिः श्री सुमितकुमार बिस्वास महोदयः स्वप्रेरणादायक-उद्बोधने अनुशासनस्य महत्त्वं बहुभिः दृष्टान्तैः स्पष्टीकृतवान्। तेन उक्तम् यत् नेतृत्वस्य प्रथमं चरणम् अनुशासनमेव अस्ति, यत् उत्तरदायित्वस्य चरित्रनिर्माणस्य च मूलाधारः भवति। राष्ट्रस्य, समाजस्य, परिवारस्य च सम्यग् उत्तरदायित्व-निर्वहनमेव नेतृत्वस्य सफलतायाः परिचायकम् इति तेन प्रतिपादितम्। नव-निर्वाचितेभ्यः छात्र-नेतृभ्यः स्नेहाशीर्वादाः मंगलकामनाश्च प्रदत्ताः।

कार्यक्रमस्य प्रमुखाकर्षणं “पद-सञ्चलनम्” तथा नव-निर्वाचितानां छात्रनेतृणां शपथग्रहणम् आसीत्। अस्मिन् प्रसङ्गे छात्राः अनुशासनस्य, सत्यनिष्ठायाः, सेवाभावस्य च पालनस्य दृढं संकल्पम् अकुर्वन्। विद्यार्थिनां तालबद्धगमनम् उत्साहपूर्णा प्रस्तुति च दर्शकान् मन्त्र-मुग्धान् अकरोत्।“कर्तव्य-संकल्प”-नाम्नि भावपूर्णे क्षणे विद्यार्थिभिः राष्ट्रस्य, समाजस्य, विद्यालयस्य च प्रति स्वकर्तव्यपालनस्य शपथः गृहीतः।

सम्पूर्णः सभागारः करतलध्वनिभिः गुंजितः अभवत्।

सांस्कृतिक-कार्यक्रमस्य अन्तर्गतं प्रेरणादायक-गीत-प्रस्तुत्या एषः संदेशः प्रदत्तः यत् अद्यतनः युवा एव राष्ट्रस्य वास्तविकः भाग्यविधाता अस्ति, यः स्वसंस्कारैः, परिश्रमेण, समर्पणेन च भारतं नूतन-उच्चतासु नेतुं समर्थः अस्ति। दर्शकैः विद्यार्थिनां आत्मविश्वासः, सामूहिकस्वरः, भावपूर्ण-प्रस्तुतिश्च प्रशंसिता।ततः परं “तिलकार्पणम्” तथा “स्वस्तिवाचनम्” इत्येतयोः वैदिक-विध्योः आयोजनम् अभवत्। वैदिकमन्त्र-उच्चारणस्य मध्ये नव-निर्वाचितानां छात्रनेतृणां ललाटेषु तिलकधारणं कृतम्। विद्यालयस्य प्रधानाचार्यया श्रीमत्या मुनमुन सेनगुप्तया तिलकार्पण-प्रक्रिया सम्पन्ना। मुख्यातिथिना श्री सुमितकुमार बिस्वास-महोदयेन छात्रनेतृभ्यः पदपत्राणि प्रदाय अभिनन्दनम् अभिषेकश्च कृतः।

“कर्तव्य-संकल्प”-प्रक्रियायां प्रधान-सेवकैः विद्यालयस्य, समाजस्य, राष्ट्रस्य च प्रति स्वकर्तव्य-निर्वहनस्य दृढः संकल्पः स्वीकृतः।सांस्कृतिक-प्रस्तुतिषु “सेवा स्वात्मनः पूर्वम्” इति नृत्यनाटिका विशेषरूपेण प्रशंसनीया आसीत्। अस्याः माध्यमेन अनुशासनस्य, परिश्रमस्य, लक्ष्यप्राप्तेः च महत्त्वं प्रभावपूर्णतया निरूपितम्। विद्यार्थिभिः भारतीय-कला-संस्कृतेः जीवन्तं स्वरूपं प्रस्तुतम्।विद्यालयस्य प्रधानाचार्या श्रीमती मुनमुन सेनगुप्ता “स्नेहाशीष”-रूपेण विद्यार्थिनः प्रेरितवती यत् शिक्षा केवलं ज्ञानप्राप्तिः न, अपितु जीवनमूल्यानां व्यवहारिकबोधस्य च पोषणम् अस्ति। अनुशासनं सफलतायाः आधारशिला इति उक्त्वा सा विद्यार्थिनः चरित्रम्, सेवाभावम्, आत्मनियन्त्रणम् च जीवने स्वीकर्तुं प्रेरितवती।विद्यालयेन आयोजितायां छात्र-नेतृत्व-चयन-प्रक्रियायां नामाङ्कनम्, उपलब्धि-विवरणम्, निर्वाचन-प्रचारः, साक्षात्कारः, मतगणना च सम्यक् पारदर्शितया सम्पन्ना। अभिभावकाः एतत् दृष्ट्वा अतीव प्रफुल्लिताः अभवन् यत् विद्यार्थिनां नेतृत्व-चयनम् योग्यता, निष्ठा, पारदर्शिता च आधारीकृत्य कृतम्।

प्रधान-विद्यार्थि-प्रतिनिधयः —
प्रधान-छात्रः — शिवशङ्करगुप्तः
प्रधान-छात्रा — अहाना मिश्रा
सांस्कृतिक-प्रधान-छात्रः — दिवित जैनः
सांस्कृतिक-प्रधान-छात्रा — सानवी सिंहा
क्रीडा-प्रधान-छात्रः — भास्कर दुबे
क्रीडा-प्रधान-छात्रा — अनिशा सिंहानिया
सदन-कप्तानाः —
रक्त-सदनम् — गौरी सिंहा
हरित-सदनम् — नित्यप्रतापसिंहः
नील-सदनम् — राज्यदा शाह
पीत-सदनम् — अनविता पाठक

एतेषां सह ४१ प्रतिनिधि-प्रिफेक्ट्स अपि सेवाकार्यस्य संकल्पं स्वीकृतवन्तः।

अस्मिन् भव्ये समारोहे विद्यालयस्य समस्त-शिक्षकाः, विभिन्न-विभागानां समन्वयिकाः, अभिभावकाः, विशिष्टातिथयः च उपस्थिताः आसन्। सर्वेषां सहयोगेन अयं समारोहः प्रेरणादायकः, स्मरणीयः, मार्गदर्शकश्च अभवत्।

कार्यक्रमस्य समापनं धन्यवाद-ज्ञापनेन अभवत्। अन्ते “वन्दे मातरम्” इति राष्ट्रियगीतस्य सामूहिक-गायनेन सम्पूर्णः वातावरणः राष्ट्रभक्त्या ओतप्रोतः अभवत्। कार्यक्रमस्य सञ्चालनं धन्यवाद-ज्ञापनं च छात्राभ्यां श्रेया प्रसाद तथा नैना इत्याभ्यां सम्यक् निर्वाहितम्।

Delhi Public School Varanasi विद्यालयेन पुनरेकवारं सिद्धीकृतम् यत् शिक्षायाः वास्तविकः उद्देश्यः केवलं पुस्तकीय-ज्ञानप्रदानम् न, अपितु विद्यार्थिषु आत्मविश्वासस्य, उत्तरदायित्वस्य, सेवाभावस्य, सांस्कृतिक-चेतनायाश्च विकासः अस्ति। सम्पूर्णः आयोजनः विद्यालयस्य समृद्ध-सांस्कृतिक-परम्परायाः, अनुशासनस्य, बहुआयामि-विद्यार्थि-विकासस्य च उत्कृष्टम् उदाहरणम् आसीत्।

अस्मिन् कार्यक्रमे चेतना-विभागस्य समन्वयिका सुनिपा सान्याल, समर्पण-विभागस्य समन्वयिका किरण शर्मा, शैक्षणिक-प्रमुखा रोली मानखण्ड, प्रधानाचार्या मुनमुन सेनगुप्ता, शिक्षकाः नीलू दीक्षित, नवीन उपासनी, सदाशिव तिवारी इत्यादयः उपस्थिताः आसन्।

